भारतमञ्जरी/गदापर्व

< भारतमञ्जरी

गदापर्व

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।

देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १०.१ ॥

ततो द्रौणिमुखा वीराः समभ्येत्य रथास्त्रयः ।

ह्रदं प्रविष्टं राजानमूचुर्मानधनं शरैः ॥ १०.२ ॥

राजन्नुत्तिष्ठ संग्रामे जहि शत्रुं धनुर्धर ।

सहास्माभिरयं कालो विक्रमस्य यशोभुवः ॥ १०.३ ॥

इति श्रुत्वा कुरुपतिः प्रशंसंस्तत्पराक्रमम् ।

ऊचे प्रातः समाश्वास्य मम क्षत्रोचिता गतिः ॥ १०.४ ॥

इति तेषां समालापं श्रुत्वा ज्ञात्वा सुयोधनम् ।

शशंसुर्भीमसेनाय लुब्धका धनलुब्धकाः ॥ १०.५ ॥

भीमसेनगिरा राजा ससैन्योऽथ युधिष्ठिरः ।

कृष्णप्रधानैः सहितस्तं देशं तूर्णमाययौ ॥ १०.६ ॥

गर्जद्गजरथानीकैः पार्थान्वीक्ष्य समागतान् ।

नरेन्द्रसूचनभयात्प्रययुर्गौतमादयः ॥ १०.७ ॥

तस्य कृष्णस्य वचसा धर्मसूनुः सुयोधनम् ।

ततः स सलिलान्तःस्थमुवाच क्ष्माभृतां वरः ॥ १०.८ ॥

राजन्रजतकर्पूररजनीपतिसुन्दरम् ।

अहो वीर यशः शुभ्रं भवता मलिनीकृतम् ॥ १०.९ ॥

घातयित्वा नरपतींल्लक्ष्मीकुलगृहान्रणे ।

प्राणरक्षापरो मानी कथं जीवन्न लज्जसे ॥ १०.१० ॥

उत्तिष्ठ युद्धे स्वां लक्ष्मीं त्रिदिवं वा समाप्नुहि ।

लाक्षः समो हि वीराणां विजयो निधनं नु वा ॥ १०.११ ॥

इति यौधिष्ठिरं श्रुत्वा वचो मन्युविषाकुलः ।

प्राह दूर्योधनस्तोये स्तम्भेरमिव श्वसन् ॥ १०.१२ ॥

एवमेतद्यथात्थ त्वं श्रियं निधनमेव मे ।

बन्धुस्वजनहीना तु लक्ष्मीः कस्य मनः स्पृशेत् ॥ १०.१३ ॥

ध्वजिनी वीरहीनेन गोष्ठीव बुधवर्जिता ।

स्वजनेन विना लक्ष्मीः कस्य प्रीणाति मानसम् ॥ १०.१४ ॥

स कर्णः सुहृदामग्र्यः स गुरुः स पितामहः ।

विना तपोवनमहो सुमुनेः कस्य विस्मरेत् ॥ १०.१५ ॥

बन्धुमित्रवियुक्तानां भूतयो हि विडम्बनाः ।

अन्धानामिव सौन्दर्यविचित्राश्चित्रमालिकाः ॥ १०.१६ ॥

भुङ्क्ष्व भुक्तां मया पृथ्वीं वीररत्नविवर्जिताम् ।

वैराग्यमुक्ताभरणां जरतीमिव योषितम् ॥ १०.१७ ॥

इत्याकर्ण्य पृथासूनुर्धार्तराष्ट्रमभाषत ।

दिष्ट्या तपोवनरुचिः शान्तोऽसि वसुधापते ॥ १०.१८ ॥

सूच्यग्रमपि न त्याज्यं पाण्डवान्प्रति ते भुवः ।

समग्रां पृथिवीमद्य दातुमिच्छसि कौतुकम् ॥ १०.१९ ॥

उत्तिष्ठ युद्धमेकेन तवास्तु विजितः स चेत् ।

जिताः सर्वे त्वया राजन्मा प्रलापैः कृशो भव ॥ १०.२० ॥

उदतिष्ठन्निशम्यैतत्पार्थवाक्यं नृपः क्रुधा ।

सावलेपं वचः श्रुत्वा न सहन्ते हि मानिनः ॥ १०.२१ ॥

हेमाङ्गदगदापाणिः सुमेरुरिव शृङ्गवान् ।

उत्थितः स बभौ राजा दण्डधार इवापरः ॥ १०.२२ ॥

कृष्णवाक्यात्स संनद्धो गदापाणिर्वृकोदरः ।

तस्य तस्थौ पुरः कृष्णानिकारगणनापरः ॥ १०.२३ ॥

▪ ▪ ▪ ▪ ▪ दुर्योधनाविर्भावः ॥ १ ॥ *****

अत्रान्तरे हलधरः कुरुपाण्डवसंक्षये ।

बन्धुनाशभयोद्विग्नस्तीर्थयात्रागतः शनैः ॥ १०.२४ ॥

तदाभ्येत्य कुरुक्षेत्रं तावपश्यद्गदायुधौ ।

शिष्ययोः समरं पश्यञ्शृण्वन्निव गिरो मिथः ॥ १०.२५ ॥

स पूजितः कृष्णमुख्यैः पार्थैः शशिशतद्युतिः ।

उपाविशन्नीलवासा हिमवानिव साम्बुदः ॥ १०.२६ ॥

इत्याकर्ण्य कथापध्ये पप्रच्छ जनमेजयः ।

तीर्थयात्रां हलभृतो वैशम्पायनमादरात् ॥ १०.२७ ॥

सोऽब्रवीत्प्रस्तुते युद्धे कुरुपाण्डवभूभुजाम् ।

आमन्त्र्य कृष्णं प्रययौ क्षयाशङ्की प्रलम्बहा ॥ १०.२८ ॥

पुष्पेण निर्गतो रामो द्विजेभ्यः सर्वकामदः ।

सरस्वतीमवाप्याथ प्रभासं शयनेन सः ॥ १०.२९ ॥

यत्र तारापतिं तारा रोहिणीसक्तमानसम् ।

खिन्ना न्यवेदयत्पित्रे तच्छापात्सोऽभवत्क्षयी ॥ १०.३० ॥

क्षणेन शापात्प्रक्षीणे शशलक्ष्मणि यक्ष्मणा ।

सर्वक्षयभयोद्विग्नैर्दैवैर्दिष्टं तदा ययौ ॥ १०.३१ ॥

तत्प्रभासं हसंस्तूर्णं तत्रापि प्राप पूर्णताम् ।

तत्र भराद्वजः स्नात्वा त्रितकूपं समाययौ ॥ १०.३२ ॥

उपेक्षितः पुरा यत्र भ्रातृभ्यां नृपतिस्त्रितः ।

स चक्रे मानसं यज्ञं ततो देवाः समभ्ययुः ॥ १०.३३ ॥

ततो वरात्सकूपोऽभूत्सोमपानफलप्रदः ।

तस्मिन्सरस्वतीतीरे सस्ने रामेण सादरम् ॥ १०.३४ ॥

ततो विनशनं पुण्यं प्राप यत्र सरस्वती ।

शूद्रभीरुकविद्विष्टा विनष्टा दुष्टनाशिनी ॥ १०.३५ ॥

स भूमिकं ततः प्रायाद्बली यत्राप्सरःसखा ।

क्रीडन्ति सुरगन्धर्वा नृत्यगीतविनोदनैः ॥ १०.३६ ॥

दुर्गस्रोतः शङ्खतीर्थं पुण्यं द्वैतवनं तथा ।

अवाप्य नगधन्वानं वसतिर्यत्र वासुकेः ॥ १०.३७ ॥

विवेश नैमिष रामो यत्र प्राची सरस्वती ।

मुनीनां दर्शनं यत्र नैमिषारण्यवासिनाम् ॥ १०.३८ ॥

सप्त सारस्वतं प्रायाद्यत्र चङ्कणको मुनिः ।

ननर्त गात्रादालोक्य निजाच्छाकरसं स्रुतम् ॥ १०.३९ ॥

नृत्यतस्तस्य सावेगं सखेलं वरकाननम् ।

मुनेस्तपःप्रभावेन जगत्सर्वं ननर्त च ॥ १०.४० ॥

देवैरथार्थितोऽभ्येत्य तस्य शम्बरदर्शनात् ।

स्वकरान्निःसृतं भस्म तेनाभून्निर्मदो मुनिः ॥ १०.४१ ॥

तस्मै स्तुतिकृते तुष्टस्तपोवृद्धिं ददौ विभुः ।

सप्तसारस्वते तीर्थे संनिधानं च शंकरः ॥ १०.४२ ॥

कपालमोचनं प्राप तीर्थमौशनसं बलः ।

यत्र जङ्घाग्रहान्मुक्तो मुनिर्घोरान्महोदरः ॥ १०.४३ ॥

राघवेषुनिकृत्तस्य राक्षसस्य शिरः पुरा ।

महोदरस्य जङ्घायां लग्नं किल विसर्पदम् ॥ १०.४४ ॥

सर्वतीर्थनिमग्नोऽपि तत्रैव स्वास्थ्यमाप सः ।

उत्तङ्काश्रममासाद्य पृथूदकमवाप च ॥ १०.४५ ॥

वसिष्ठेन जितः पूर्वं धेनुहृद्ब्रह्मतेजसा ।

राजन्यवंश्यो यत्राप ब्रह्मतां कौशिको मुनिः ॥ १०.४६ ॥

तत्र रामो ददौ भूरि धनं वार्ष्णेयनन्दनः ।

ततः सारस्वते कुञ्जे यत्रेन्द्रो नमुचेर्वधात् ॥ १०.४७ ॥

ब्रह्महत्याकुलो मुक्तस्तं प्राप दारुणं शनैः ।

सोमतीर्थं ततः प्राप यत्रेष्टममृतत्विषा ॥ १०.४८ ॥

तारकख्यो हतो यत्र षण्मुखेन महासुरः ।

स्कन्दाभिषेकात्स्नात्वाथ वह्नितीर्थं समाययौ ॥ १०.४९ ॥

यत्रानलो भृगोः शापान्नष्टोऽभून्निर्वृतः पुनः ।

कौबेरमिन्द्रतीर्थं च यामुनं चाच्युताग्रजः ॥ १०.५० ॥

देवलस्याश्रमं प्राप्य जैजीषव्यः सुयोगवित् ।

यत्र सर्वगतं ब्रह्म देवलाय जगौ मुनिः ॥ १०.५१ ॥

ततः सारस्वतं तीर्थमाससाद हलायुधः ।

अपसरोदर्शनात्पूर्वं शुक्रं निपतितं जले ॥ १०.५२ ॥

दधीचस्य मुनेस्तेन पुत्रं लेभे सरस्वती ।

दधीचस्यास्थिनिचये महेन्द्रायुधतां गते ॥ १०.५३ ॥

अनावृष्ट्यां स तनयस्तया मत्स्याशनैर्वृतः ।

सारस्वतः सुतो वेदान्स सस्मार महामतिः ॥ १०.५४ ॥

दुर्भिक्षकर्षिता नाम विस्मृतेऽध्ययने ततः ।

सर्वेषां मुनिमुख्यानां बभूव गुरुरर्थितः ॥ १०.५५ ॥

तस्मिंस्तीर्थे बलः स्नात्वा ययौ यत्र पुरा वपुः ।

सनत्कुमारी तपसा स्वर्गाय त्यक्तुमुद्यता ॥ १०.५६ ॥

नारदः प्राह नोद्वाहं विना स्वर्गो भवेदिति ।

सा गालवसुतायैव दिनभोग्यां तनुं ददौ ॥ १०.५७ ॥

कृत्वा ललितमाकारं त्रिदिवं च ययौ ततः ।

तत्र स्नात्वा च दत्वा च प्लक्षप्रस्रवणे तथा ॥ १०.५८ ॥

अवाप कारपवनं तीर्थान्यालोकयञ्शनैः ।

नारदात्तत्र शुश्राव कुरुक्षेत्रे नृपक्षयम् ॥ १०.५९ ॥

- - - - - रामतीर्थयात्रा ॥ २ ॥ *****

पृष्टोऽथ धृतराष्ट्रेण संजयो युद्धमब्रवीत् ।

भीमसेनस्य विरथं कौरवस्य च मानिनः ॥ १०.६० ॥

समन्तपञ्चकं गत्वा पद्भ्यामेव सुयोधनः ।

तस्थावकम्पो महतामधिकं धैर्यमापदि ॥ १०.६१ ॥

ततो दुर्योधनोऽवादीद्धर्मपुत्रं सहानुगाः ।

उपविश्य निरीक्षन्तां भवन्तो युध्यमानयोः ॥ १०.६२ ॥

अजातशत्रुः श्रुत्वैतत्सह पाञ्चालसैनिकैः ।

उपाविशत्कृष्णसखः परिवार्य हलायुधम् ॥ १०.६३ ॥

अथ भीमं गदापाणिं बद्धकक्षस्तरस्विनम् ।

आजुहाव वचोयुद्धे प्रवृत्ते कुरुनन्दनः ॥ १०.६४ ॥

ततस्तयोर्गदाघातजाता वह्निकणावली ।

विदधे संभ्रमावृत्तहेमाभरणविभ्रमम् ॥ १०.६५ ॥

सुरैरापूरिते व्योम्नि युद्धदर्शनलालसैः ।

बभूव नाककान्तानां कोऽपि कौतुकविभ्रमः ॥ १०.६६ ॥

आक्षेपे वर्जने मोक्षे राजवृत्तौ निवर्तके ।

धावने समवस्थाने विप्लुते समविप्लुते ॥ १०.६७ ॥

तौ प्रगल्भतया वीरौ चित्रमण्डलचारिणौ ।

सनिर्घोषं महावेगः पार्श्वदेशमताडयत् ॥ १०.६८ ॥

ततो भीमः समाधूय गदामशनिनिःस्वनाम् ।

भ्रामयामास येनाभूद्घोरो घरघरारवः ॥ १०.६९ ॥

ततस्तां प्रहिणोद्भीमो गिरिगुर्वीं गदां जवात् ।

अकम्पितस्ताडितोऽपि पुनर्भीमोऽसृजद्गदाम् ।

पुनर्मोघीकृता राज्ञा सापतत्कम्पितावनिः ॥ १०.७० ॥

अथ वक्षस्तटे भीमः कौरवेण समाहतः ।

न विवेद क्षणं किंचिन्मूर्छाव्याकुलिताशयः ॥ १०.७१ ॥

पाञ्चालसृञ्जयानीके संदेहाकुलिते ततः ।

शनैर्भीमः समाश्वस्य पार्श्वे नृपमताडयत् ॥ १०.७२ ॥

गाढप्रहाराभिहतः पतितः कौरवेश्वरः ।

उत्थाय तूर्णमाहत्य भुवि भीममपातयत् ॥ १०.७३ ॥

अथापतत्सुरोत्सृष्ट पुष्पवृष्टिर्यशःसिता ।

साधुवादावली मूर्ध्नि सूनवे कुरुभूपतेः ॥ १०.७४ ॥

अथोत्थिते भीमसेने परिमृज्याशु शोणितम् ।

कोऽनयोरधिको योद्धा पप्रच्छेत्यर्जुनो हरिम् ॥ १०.७५ ॥

सोऽब्रवीद्बलवान्भीमो भीमवीर्यः किमुच्यते ।

उपदेशे गदायुद्धे किंतु युद्धपराक्रमे ॥ १०.७६ ॥

स प्रयत्नः कुरुपतिर्भीमसेनाद्विलोक्यते ।

तस्मान्न धर्मयुद्धेन भीमः शक्तो निपातने ॥ १०.७७ ॥

मायया निहता दैत्या मायावध्या हि मायिनः ।

ऊरुभङ्गमतो भीमो विदधात्वस्य मायया ॥ १०.७८ ॥

अन्यथा दुर्जयो राजा त्रयोदशसमाव्यधात् ।

एष लोकभयं भीमो(मे) विधाय गदया श्रमम् ॥ १०.७९ ॥

व्यायामचतुरो वेगादूर्ध्वचारी सुयोधनः ।

महाशैलेयभङ्गोऽस्मिन्सुकरश्छिद्रदर्शनात् ॥ १०.८० ॥

उक्ते जनार्दनेनेति भीमश्चिक्षेप भीषणाम् ।

गदां तां कुरुराजोऽपि विलङ्घ्य तमताडयत् ॥ १०.८१ ॥

व्यथां संस्तम्भ्य भीमोऽथ घूर्णमानतनुः क्षणम् ।

गदां रन्ध्रं विचिन्त्यास्मै प्राहिणोत्कनकाङ्गदाम् ॥ १०.८२ ॥

पुष्पायुधपुरोदारहेमाभरणविभ्रमे ।

ऊरुयुग्मे भुजङ्गीव सा पपात महीपतेः ॥ १०.८३ ॥

निर्घातघोरघनघोषगदानिपातनिष्पेषजर्जरतरत्रुटितोरुसंधिः ।

दुर्योधनोऽथ निपपात दिवं विलोक्य वज्रावपातहतपक्ष इवाद्रिराजः ॥ १०.८४ ॥

अक्षौहिणीपतिनरेश्वरमौलिरत्नरश्मिच्छटापटलपाटलपादपीठे ।

अस्मिन्महीपरिवृढे पतिते च भूमौ कैर्निन्दितं न भवभङ्गुरभङ्गि जन्म ॥ १०.८५ ॥

■ ■ ■ ■ ■ गदायुद्धम् ॥ ३ ॥ *****

तस्मिन्नेकादशचमूनाथे भुवि निपातिते ।

चकम्पे लोलतटिनीरशना वसुधावधूः ॥ १०.८६ ॥

बभूव भयदैर्व्याप्तं दुर्निमित्तशतैर्जगत् ।

प्रशंसन्तश्च तद्युद्धं प्रययुर्व्योमचारिणः ॥ १०.८७ ॥

भीमो निकारगणनां कुर्वन्कुरुपतेः शिरः ।

चरणेनास्पृशल्लक्ष्मीविलाससदनं ततः ॥ १०.८८ ॥

तं विलोक्य रुरोदेव पतितं चक्रवर्तिनम् ।

त्वङ्गद्गदाङ्गदच्छिन्नहारमुक्ताश्रुभिर्मही ॥ १०.८९ ॥

भीमं निरस्य गर्जन्तं धर्मराजः सुयोधनम् ।

ऊचे राजंस्तवैवायमनयात्सुहृदां क्षयः ॥ १०.९० ॥

दृष्ट्वा शिरः पदा स्पृष्टं भीमेन जगतीभुजः ।

प्राहोत्तालहलः कोपकरालस्तालललाञ्छनः ॥ १०.९१ ॥

प्रतापतापितरिचोर्यशः शत्रुहृतश्रियः ।

शिरो व्याजहतस्यास्य कः स्पृशेदपशुः पदा ॥ १०.९२ ॥

इत्युक्त्वा क्रोधशिखिना तं भीमं दग्धुमुद्यतम् ।

शमयामास कंसारिस्तैस्तैर्विनयभाषितैः ॥ १०.९३ ॥

विषद्युताग्निदोषाणां प्रभावोऽसीति वादिनम् ।

कृष्णं दुर्योधनोऽवादीत्संस्तम्भ्य रुजमुत्कटाम् ॥ १०.९४ ॥

गोपालबाल मूर्खाणां संज्ञां कृत्वास्मि वञ्चितः ।

त्वया भीष्ममुखा वीरास्ते व्याजैरेव पातिताः ॥ १०.९५ ॥

भुक्तं सुहृद्भिर्विहृतं कान्ताभिर्हुतमग्र्यजैः ।

वधः क्षत्रोचितः प्राप्तः कोऽन्योऽस्ति सदृशो मया ॥ १०.९६ ॥

भ्रूभङ्गेन निवासिता वनभुवं शुष्यन्मुखाः शत्रवो दृष्टा श्रीः स्वयमर्पिताग्र्यसुहृदामुष्णीषहारस्मिता ।

संग्रामेऽप्यपराङ्मुखस्य निधनं दिक्षु प्ररूढं यशः कर्तव्य स्पृहणीयमन्यदिचितं युक्तं किमस्त्यायुषः ॥ १०.९७ ॥

इत्याकर्ण्य वचस्तस्य लज्जिता इव मानिनः ।

नृपैः सह ययुः पार्था नादयन्तो रथैर्जयम् ॥ १०.९८ ॥

अथावरोप्य प्रथमं फल्गुणं मधुसूदनः ।

रथादवातरत्पस्चाज्जज्वाल स रथस्ततः ॥ १०.९९ ॥

द्रोणकर्णास्त्रदग्धोऽयमत्यन्तं ज्वलितो रथः ।

इति पृष्टोऽवदत्पार्थं विस्मितं कालियान्तकः ॥ १०.१०० ॥

श्रुत्वेति संजयाद्राजा दारुणं मोहविह्वलः ।

शुशोच पुत्रान्वाक्यानि विदुरस्य स्मरन्मुहुः ॥ १०.१०१ ॥

ततः कृष्णमुनौ प्राप्ते कुरुवेश्म हरिर्नृपम् ।

गान्धारीं चावदत्प्राप्य विसृष्टोऽजातशत्रुणा ॥ १०.१०२ ॥

याचितोऽपिशमं नैच्छत्कौरवो निजदुर्नयात् ।

न च धर्माच्च्युताः पार्थास्तेन तेन पदं रुषः ॥ १०.१०३ ॥

पुत्रास्ते युवयोरद्य पाण्डुपुत्राः सुरत्विषः ।

युवाभ्यामेव चोक्तं प्राग्यतो धर्मस्ततो जयः ॥ १०.१०४ ॥

इति प्रसाद्य तौ याते वृष्णिवीरेऽम्बिकासुतः ।

मुनावाश्वास्य याते च शेषं पप्रच्छ संजयम् ॥ १०.१०५ ॥

सोऽब्रवीदथ पुत्रस्ते वेष्य(प)मानो महीतले ।

मामूचे पश्य सूदेन माययाहं निपातितः ॥ १०.१०६ ॥

अत्रान्तरे समभ्येत्य द्रौणिहार्दिक्यगौतमाः ।

ददृशुः कौरवपतिं नीतं कालेन तां दशाम् ॥ १०.१०७ ॥

ततो गुरुसुतः कोपाद्विनिष्पिष्य करे करम् ।

निःशेषशत्रुनिधने प्रतिज्ञां निःश्वसन्व्यधात् ॥ १०.१०८ ॥

अथ वीरं तमालिङ्ग्य चक्रे सेनापतिं नृपः ।

न ह्यहंकारशैथिल्यं पर्यन्तेऽप्यभिमानिनाम् ॥ १०.१०९ ॥

प्रलयाम्बुदनिर्घोषं विनद्य द्रोणनन्दनः ।

निशायां तां रुजा राजा विषमामगमद्दशाम् ॥ १०.११० ॥

ततो गौतमहार्दिक्यगुरुपुत्रा महावनम् ।

विविशुः कलयन्तोऽन्तः श्रियः कल्लोललोलताम् ॥ १०.१११ ॥

इति क्षेमेन्द्रविरचितायां भारतमञ्जर्यां गदापर्व

"https://sa.wikisource.org/w/index.php?title=भारतमञ्जरी/गदापर्व&oldid=101996" इत्यस्माद् पुनः प्राप्तिः

- ३१ जनवरी २०१७ (तमे) दिनाङ्के अन्तिमसम्पादनं ०७:४७ समये अभवत्
- पाठः क्रियेटिव कॉमन्स ऐट्रिब्यूशन/शेयर-अलाइक अभिज्ञापत्रस्य अन्तर्गततया उपलब्धः अस्ति; अन्याः संस्थित्यः अपि सन्ति । अधिकं ज्ञातुम् अत्र उपयोगस्य संस्थितिं पश्यतु ।